# शालतोड़ा नेताजी सेन्टेनारी कलेज

सञ्चिता साँतरा
सहकारी अध्यापिका
संस्कृत विभागः



# महाकवि-भट्टिविरचितम्

## भट्टिकाव्यम्

## (रावणवधम्)



# भट्टिकवेः परिचयः

- **समयकालः** –६४१ ख्रिष्टाव्द। षष्ठशताव्देः उत्तरार्धः इति वहूनां मतम्। (मतान्तरम् अपि अस्ति)
- **जन्मस्थानम्** – गुर्जर प्रदेशः।
- **समकालीनः राजा** – वल्लभी नगरस्य नृपः श्रीधरसेनः।
- **उपनाम** – भर्तृहरिः (वाक्यपदीयकारात् भिन्नः)
- **सभापण्डितः** – श्रीधरसेनस्य सभाकविः। (‘काव्यमिदं विहितं मया वलभ्यां/श्रीधरसेननरेन्द्र पालितम्)
- **कृतिः** – रावणवधम् (भट्टिकाव्यम् इति नामान्तरम् अस्ति)।
- **शास्त्रविद्** – वैयाकरणः।

संस्कृतसाहित्याकाशेविराजमानेषु महाकाव्यकारेषु अयं महाकविः अन्यतमः। तेन विरचितं रावणवधम् अन्यन्तं प्रसिद्धम् काव्यम् । तत्र रामेण कृतः रावणवधः मुख्यः विषयः।

**प्रौढ़व्याकरणनियमे उपनिवद्धः।**

# काव्यपरिचयम्

- नामान्तरम् – भट्टिकाव्यम् (भट्टेः विरचितं काव्यम् इति भट्टिकाव्यम्)
- रचयिता – भट्टिः।
- काव्यविधा – महाकाव्यम्।
- सर्गसंख्या– २२
- श्लोकसंख्या – १६२५
- काण्डसंख्या – ४
- उपजीव्यग्रन्थम् – वाल्मीकि-रामायणम्
- विषयवस्तुः – अत्र रामस्य जन्मनः आरभ्य रावणवधम् , सीतायाः उद्धारम्, परिशेषे अभिषेकनिमित्तम् रामस्य अयोध्याम् प्रत्यागमणम् पर्यन्तं वर्णना विद्यते।
- वस्तुतः छात्राणां व्याकरणज्ञानाय, व्याकरणशिक्षनाय च इदम् काव्यम् रचितम् महाकविना भट्टिना।
- पाणिनिव्याकरणे यत् अस्ति तदेव लक्ष्मीकृत्य काव्यम् इदम् रचितम्।
- प्रमुखवृत्तम् – अनुष्टुप् छन्दः।

- मुख्यरसः – वीरः। अन्याः रसाः अपि अत्र दृश्यन्ते। परन्तु अस्मिन् महाकाव्ये महाकविना रामस्य वीरत्वम् प्रतिपादितम् तदर्थं अत्र वीररसस्य प्राधान्यम् अस्ति।
- गुणः – ओजः। वीररसस्य प्राधान्येन।
- रीतिः – गौड़ी। अन्याः रीतयः अपि दृश्यन्ते। परन्तु मुख्यरीतिः गौड़ी।
- वृत्तिः – सात्वती। यतः अत्र युद्धं, पराक्रमम्, शौर्यं इत्यादिकम् दृश्यते।
- मङ्गलाचरणम् – वस्तुनिर्देशात्मकम्।
- वैशिष्ट्यम् – पाणिनिव्याकरणशिक्षणम्।
- यतः वैयाकरणकविः भट्टिः पाणिनिव्याकरणसूत्रसमुहस्यसोदाहरणम् प्रयोगप्रदर्शनार्थम् इदम् काव्यम् रचितवान् तर्हि मल्लिनाथः इदम् काव्यम् '<u>उदाहरणकाव्यम्</u>' इति पदेन परिचीयते।

# काण्डचतुष्टयम्

- प्रकीर्णकाण्डम्
- अधिकारकाण्डम्
- प्रसन्नकाण्डम्
- तिङ्न्तकाण्डम्

# काण्डचतुष्टये व्याकरणशास्त्रालोचना

- प्रकीर्णाधिकारकाण्डयोः अष्टाध्यायीसूत्राण्युदाहरन्ति।
- प्रसन्नकाण्डे अलंकाराकानां प्रसन्नकाण्डे अलंकाराणां उदाहरणानि वर्तन्ते।
- तिङन्ततकाण्डे लकारप्रयोगविशेषाणाम् उदाहरणानि प्राप्यन्ते।

अतः एतस्य मुख्यमुद्देश्यन्तु व्याकरसूत्राणां सर्वेषामपि उदाहरणप्रदानं वर्तते।अतः एव काठिन्यं तेन सह प्रोढिमा च आधिक्येन दृश्यते। अतः व्याकरशास्त्रेण सह त्रेतायुगस्थश्रोरामकथास्मिन् वर्णिता ।

# संक्षेपकथावस्तुः

**प्रकीर्णकाण्डम्** – (१-५ सर्गः) – रामजन्मः, सीताविवाहः, रामस्यवनगमनम्,सीताहरणम्,सीतान्वेषणम्।

**अधिकारकाण्डम्** – (६-९ सर्गः) – सुग्रीवस्य राज्याभिषेकः,वानरैः सीतान्वेषणम्।

**प्रसन्नकाण्डम्** – (१०-१३ सर्गः) – सीतायाः अभिज्ञानम्,लङ्कायाः प्रभातवर्णनम्, विभीषणस्य रामं निकषा आगमनम्, सेतुवन्धकथा।

**तिङ्न्तकाण्डम्** – (१४-२२ सर्गः) – रावणवधः, रामस्य अयोध्यागमनं यावत्।

# काव्यसम्वन्धिनः महाकविना भट्टिना मतम्

व्याकरणस्य सिंहद्वारम् अतिक्रम्य काव्यपाठकाः काव्यरसास्वादम् अनुभवन्ति। तर्हि भट्टिना उक्तं –

**"दीपतुल्यः प्रबन्धोऽयं शव्दलक्षणचक्षुषाम्।**
**हस्तामर्ष इवान्धानां भवेद् व्याकरणाद् ऋते।।"**

অর্থাৎ ব্যাকরণে বুৎপন্ন পাঠকের কাছে এ কাব্য প্রদীপ স্বরূপ, কিন্তু শাস্ত্রবিমুখ ব্যক্তির কাছে এটি আবার দৃষ্টিশক্তিরিক্ত অন্ধের হাতে দর্পণের মতো নিরর্থক।

- व्याख्यानस्य साहाय्यं विना काव्यस्यास्य अनधीतवैयाकरणैः अवगमनं क्लिष्टसाध्यम् –

**" व्याख्यागम्यम् इदं काव्यम् उत्सवः।**
**हता दुर्मेधसाश्चास्मिन् विद्वत्प्रियतमा मया।।"**

অর্থাৎ আমার এ কাব্য কেবল ব্যাখ্যার দ্বারা বোধ্য, সুধীগনের কাছে এইটি উৎসবস্বরূপ কিন্তু দুর্মেধৎ ব্যক্তিগণের এ কাব্যে প্রবেশাধিকার নেই।

# भट्टिकाव्यस्य टीकाकारगणः

1. जयमङ्गलः   – जयमङ्गला टीका (प्राचीनतमा टीका, सर्वप्रसिद्धा टीका)
2. नारायणः   – भट्टवोधिनी टीका
3. मल्लिनाथः – सर्वपथीना टीका
4. कन्दर्पशर्मा – वैजयन्ती टीका
5. भरतमल्लिकः  – मुग्धवोधिनी टीका
6. कुमुदानन्द : –  सुवोधिनी टीका
7. विद्याविनोदाचार्यः – भट्टिचन्द्रिका टीका



# परिसमाप्तः।

# धन्यवादः।